# 2017

## SANSKRIT

## [Honours]

## PAPER – V

*Full Marks* : 90

*Time* : 4 hours

*The figures in the right hand margin indicate marks*

*Candidates are required to give their answers in their own words as far as practicable*

*Illustrate the answers wherever necessary*

## [NEW SYLLABUS]

1. वैदिकदेवतारूपेण सूर्य-देवस्य वैशिष्ट्यं व्याख्यायताम् । 10

*अथवा*

दाशतय्यां देवीसूक्तस्य दार्शनिकतत्त्वं विव्रियताम् ।

( Turn Over )

2. सायणदिशा सुरगिरा देवनागरलिप्या च कस्यचिदेकस्य मन्त्रस्य व्याख्या प्रदेया — 6

(i) उप॑ त्वाग्ने दि॒वेदि॑वे
दोषा॑वस्तर्धि॒या व॒यम् ।
नमो॒ भर॑न्त॒ एम॑सि ॥

(ii) स॒मा॒नो म॑न्त्रः समि॑तिः समा॒नी
स॑मा॒नं मनः॑ स॒ह चि॒त्तमे॑षाम् ।
स॒मा॒नं मन्त्र॑म॒भि म॑न्त्रये वः
स॒मा॒नेन॑ ह॒विषा॑ जुहोमि ॥

3. अधोनिर्दिष्टासु, भाष्यपंक्तिषु काचिदेका व्याख्येया सुरगिरा देवनागरलिप्या च — 6

(i) आधाने तृतीयेष्टौ प्रथमाज्यभागस्यानुवाक्या ।

(ii) संसवे निष्कवल्ये निविद्धानीयस्य पुरस्ताद् 'यो जात एव' इति शंसेत् ।

4. **Q.No.2.** प्रश्नस्थितयोः मन्त्रयोः कस्यचिदेकस्य मन्त्रस्य पदपाठःसाधनीयः । 4

5. अधोलिखितानां पदानां यथेप्सितं द्वयोः व्याकरणगता टिप्पणी कार्या — $2 \times 2$

चिकितुषी, दीदिविम् ,अकः, दिवेदिवे ।

6. मनुमत्स्यकथायाः उत्सः कः भवति ? तत्र वक्ता च कः ? तत्रस्थितस्य प्लावणवृत्तान्तस्य ऐतिहासिकमूल्यं विचारणीयम् । 5

7. (क) ईशोपनिषत् कस्मिन् वेदेऽन्तर्भूता ? तत्र विद्याविद्ययोः कोऽर्थः ? ईशोपनिषदनुसारं विद्याविद्ययोः स्वरूपं विचार्यताम् । 10

*अथवा*

ईशोपनिषदमनुसृत्य आत्मतत्त्वं स्फुटीक्रियताम् ।

(ख) अधोलिखितयोः मन्त्रयोः कस्यचिदेकस्य व्याख्या कार्या–सुरगिरा देवनागरलिप्या च — 6

(*i*) तदेजति तन्नैजति तद्दूरे तद्वन्तिके ।
तदन्तरस्य सर्वस्य तदु सर्वस्यास्य वाह्यतः ।।

(*ii*) कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः ।
एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे ।।

(*ग*) अधोलिखितेषु प्रश्नेषु यथेच्छं चतुर्णामुत्तरं सुरगिरा देवनागरलिप्या च प्रदेयम् — $1 \times 4$

(*i*) उपनिषद् शब्दस्य निर्वचनं किम् ?

(*ii*) ईशोपनिषदः मुख्यभाष्यकारः कोऽस्ति ?

(*iii*) मन्त्रशब्दस्य कोऽर्थः ?

(*iv*) 'मातरिश्वा' कः भवति ?

(*v*) के च आत्महनो जनाः ?

(*vi*) ईशोपनिषदः अन्तिमे मन्त्रे कश्च देवः उल्लिखितः ?

8. (*क*) कस्यचिदेकस्य प्रश्नस्य उत्तरं प्रदेयम् — 10

(*i*) वैदिकसाहित्ये अभिप्रायसूचकभावस्य (लेट् लकारस्य) प्रकृतिः व्याख्येया ।

(*ii*) वैदिक उपसर्गविधिः सम्यक् पर्यालोचनीयः ।

(*ख*) ससूत्रं यथेच्छम् द्वयोः व्याकरणदिशा स्वरसाधनप्रक्रिया प्रदर्शनीया — $2\frac{1}{2} \times 2$

पूर्वेभिः, पाजः, विधेम ।

9. ऋग्वेदीयधर्मनिरपेक्षसूक्तमवलम्ब्य कश्चित् निबन्धः रचनीयः । 10

*अथवा*

अथर्ववेदस्य विषयवैचित्र्यं सम्यक् पर्यालोचनीयम् ।

10. (क) कस्यचिदेकस्य टीप्पणी लेख्या — 5

वृहद्देवता, कल्पसूत्रम्, केनोपनिषत् ।

(ख) अधोलिखितेषु प्रश्नेषु यथेप्सितं पञ्चानामुत्तरं सुरगिरा देवनागरीलिप्या च प्रदेयम् — 1 × 5

(*i*) विशेषविनियोगः कतिविधः ?

(*ii*) कस्मिन् वेदे किमप्यारण्यकं नास्ति ?

(*iii*) वेदमन्त्रपाठे केषाञ्चित् विषयाणां ज्ञानमावश्यकम् ?

(*iv*) तृच्विनियोगः कः भवति ?

(*v*) यजुर्वेदस्य पुरोहितः कः भवति ?

(*vi*) स्वरितस्वरः कदा भवति ?

(*vii*) याज्यामन्त्रः कः भवति ?

———